


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2020; 2(1): 237-238
Received: 21-11-2019
Accepted: 26-12-2019

**डॉ0 अशोक कुमार**
पिता–श्री किशोरी शर्मा, ग्राम + पत्रालय–फेंट, प्रखण्ड–बासोपट्टी, जिला–मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ0 अशोक कुमार**
पिता–श्री किशोरी शर्मा, ग्राम + पत्रालय–फेंट, प्रखण्ड–बासोपट्टी, जिला–मधुबनी, बिहार, भारत

# कालिदासमते संस्कारविमर्शः

**डॉ0 अशोक कुमार**

**सारांशः**
मानवजीवनस्य शुद्धयर्थं परिष्कारार्थञ्च यत्कर्मविशेषः क्रियते स एव संस्कार इत्युच्यते। समुपसर्गपूर्वकं कृधातौ भावे करणे च घञ् प्रत्यये कृते संस्कारशब्दोऽयं निष्पद्यते। यस्यार्थो भवति भूषणम्, मण्डणम्, सुन्दरम्, अलंकरणम्, गुणाधाननिमित्तकं कर्म, विधिः पद्धतिरित्यादिः। संस्कारेण विकृतीनां परिहारो निर्गुणे सगुणाधानम्, अशुद्धीनां परिष्करणं च भवति। अनेन दोषमार्जनं गुणाधानमपूर्णस्य च पूर्णत्वं प्राप्यते सद्गुणानां संक्रमणञ्च क्रियते। वैदिककालादारभ्य संस्कारणामुदयः संदृश्यते। वेदस्य कर्मकाण्डभागे एव संस्काराण मुल्लेखः प्राप्यते। वेदः संस्काराणां मूलस्रोतो भवति। वैदिकमन्त्राः संस्कारेषु उपयुज्यन्ते। धार्मिककृत्येषु विधिविधानेषु सामान्यतो वैदिकमन्त्राणां विनियोगः दृश्यन्ते।

**प्रस्तावना :**
संस्कारं विना किमपि वस्तु कोऽपि जनः ग्रहणयोग्यो व्यवहारयोग्यश्च न भवति। संस्कारेण नरः संस्कृतो भवति। एनं विना मानवजीवने व्यक्तित्वस्य विकाशो नैव भवति। मुख्यतः षोडशसंस्कारैः संस्कृतो जनः जीवत्वं विहाय सच्चिदानन्दरूपं ब्रह्मपदमधिगच्छति। ब्राह्मसंस्कारसंस्कृतो नरः ऋषीणां समानतां समानलोकतां प्रयोज्यतां गच्छति।
दैवसंस्कारसंस्कृतः नरः देवानां समानतां समानलोकतां सायोज्यतां च गच्छति। संस्कारेण मनुष्यस्य बैजिकं गार्भिकं च दोषा अपगच्छन्ति। यथोक्तं मनुना –

गार्भैहोमैर्जातकर्मचौडमोञ्जीनिबन्धनैः।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते।। [1]

संस्काराणां लोकप्रियप्रयोजनं तथा संस्कारमाध्यमेनामङ्गलजनितप्रभावं निराकृत्य हितकरप्रभावप्राप्तये संस्कारस्योपादेयता सर्वदा अनुभूयते। अतः संस्काराणां यथार्थपर्यालोचनेन महत्त्वं साधु अवसीयते।
जना आकृष्टाः भवेयुः 'कार्य शरीरसंस्कारः पावनः प्रेत्य चेह च' इति मनूक्तिः संस्काराणामवश्यंकर्त्तव्यत्वं सूचयति। मनुष्यः जन्मतः प्रारभ्य संस्कारैः संस्कृतो भवति। अन्यथा सर्वविधेषु कर्मसु अयोग्यो भवति।
संस्कारशब्दः अंग्रेजीभाषायां सा क्रामेन्ट ँ(बतंउमदज) शब्देन बहुलं व्यवहृयते। धार्मिकविधानमेव साक्रामेन्ट शब्दस्यार्थो भवति। साहित्ये शुद्धिप्रायश्चितव्रतादिषु अन्तर्भवति। संस्कारशब्दः दार्शनिकदृष्ट्या मीमांसका एवमभिवदन्ति यत् यज्ञाङ भूतपुरोडाशादीनां विधिवत् शुद्धिरिति। अद्वैत्तवेदान्तिनो जीवोपरि शरीरक्रियायाः मिथ्यारोप इति प्रतिपादयन्ति। नैयायिकाः भावस्य व्यक्तिकरणाय आत्मव्यञ्जकशक्तिः संस्कार इति कथयन्ति। वैशेषिकदर्शने चतुर्विंशतिगुणेषु अन्तर्भवति संस्कारः। संस्कृतसाहित्ये संस्कारस्य प्रयोगः शिक्षा–संस्कृति– प्रशिक्षण– सौजन्य– पूर्णता– व्याकरणगतशुद्धिसंस्करण– परिष्करण– शोभा– आभूषण–प्रभाव–स्वरूप–स्वभाव– क्रिया–अभिषेक–विचार–भावना– धारणा– परिणाम–क्रियादि अर्थेषु प्रयुक्ताः दृश्यन्ते। कालिदाससाहित्येऽपि संस्काराः विभिन्नेषु अर्थेषु व्यवहृयन्ते। यथा रघुवंशे निसर्ग संस्कार विनीत इत्येतौ। यथा–

नृपेणचक्रे युवराजशब्दभाक [2]।

पुनश्च प्रयुक्तसंस्कार इवाधिकं वभौ [3]। शाकुन्तलेऽपि 'स्वभावसुन्दरं वस्तु न संस्कारमपेक्षते [4]। यद्भवतु कालिदाससाहित्ये संस्कारस्य योऽर्थः धर्मशास्त्रे प्रयुक्तः सोऽपि तत्रैव कृतः दृश्यते। धर्मशास्त्रे ये षोडशसंस्काराः वर्णिताः सन्ति त एव संस्काराः कालिदाससाहित्येऽपि दृश्यन्ते। धर्मशास्त्रे संस्काराणां प्रामुख्यमाचारभागः प्रकटी करोति, संस्काराणां विधिविधानं तत्सम्बन्धि नियमाश्च वर्ण्यन्ते। ते च संस्कारा मन्वादिस्मृतिकाराणां गौतमादिसूत्रकाराणां मतानुसारं भिद्यन्ते। यथा मनुना त्रयोदश, गौतमेन अष्टचत्वारिंशत्, बौधायनेन चत्वारः आपस्तम्बेन सप्तसंस्काराः वर्णिताः। यद् भवतु विभिन्नस्मृतिनिबंधकाराणां मतानुसारं संस्काराणां भिन्नता प्रतिपादितेऽपि मुख्यतः षोडशसंस्काराणां वर्णनं विद्यते। ते एव मुख्यषोडशसंस्काराः यथा–

| | | |
|---|---|---|
| 1. गर्भाधानम् | 2. पुंसवनम | 3. सीमन्तोन्नयनम् |
| 4. जातकर्म | 5. नामकरणम | 6. कर्णवेधः |
| 7. बहिर्निष्क्रमणम् | 8. अन्नप्राशनम् | 9. चूड़ाकर्म |
| 10. वेदारम्भः | 11. उपनयनम् | 12. समावर्तनम् |
| 13. केशान्तः | 14. गोदानम् | 15. विवाहः |
| 16. अन्त्येष्टिश्चेति। | | |

प्राक्तनकाले गर्भाधानादारभ्य अन्त्येष्टिं यावत् जनाः संस्कारैः संस्कृता अभवन्। संस्कारैः संस्कृतजनानां ज्ञानक्षमता–धर्मरूचीनां विकाशश्च संभवतः। संस्कारसम्बन्धिज्ञानं विकाशश्च जनानां मनसि आनन्दमुत्पादयतः। विज्ञानदृष्ट्या संस्कारैः संस्कृतस्य जनस्य जीवनमतीवमहत्वपूर्णं भवति। ये जनाः संस्कृताः भवन्ति तेषां जीवनमूल्यं सुरक्षितं ज्ञानोपेतं च भवति। तस्य जीवनं निष्ठ्या विश्वासेन च पूर्णं भवति। सामाजिकजीवने विश्वासभावना कलाविज्ञानानि परस्परमिश्रितानि परिपूरिकानि च भवन्ति। संस्कृताः जनाः समाजस्य कृते दीपशिखा सदृशं भवन्त्येव।
संस्कारैः अन्तःकरणं उदवयति। ते मानवं पापाद् अज्ञानाच्च निर्वाय आचारविचाराभ्यां ज्ञानविज्ञानाभ्यां च संयोजयन्ति। संस्कारैः वस्तुन उत प्राणिनोऽधिकं संस्करणम्, परिमार्जनमुपादेयकरणमेव प्राधान्येन उद्दिश्यते। अर्थात् संस्काराः पात्रतां समुद्भावयन्ति। सभ्यतायाः संस्कृत्याः प्रज्ञायाश्च विकासेन सहैव अस्माकं मनीषिणो मानवजीवनम् अधिकाधिकक्षमतासम्पन्नं संवेदनशीलं, भावप्रवणम्, उपयोगिश्च विधातुमेव संस्काराणाम् अनिवार्यता स्वीचक्रुः। जीवने संस्काराणां तावन्महत्वं यद् महर्षिः आश्वलायनः संस्कारहीनस्य जन्मैव निरर्थकं मनुते [5]–
संस्काररहिता ये तु तेषां जन्म निरर्थकम्। वस्तुतोजीवनं सार्थकं सोद्देश्यञ्च कर्त्तुं संस्कार आवश्यकः इत्यत्रनास्ति संदेहावसरः। साम्प्रतिके युगे तु विषयोऽयं विशेषमहत्वमा वहति। यतो हि वर्तमाना भारतीया सन्ततिः स्वसंस्कारेभ्यो विमुखायमाना दरीदृश्यते। स्वसंस्कृत्यनभिज्ञा युवानः पाश्चात्यसंस्कृत्या अन्धानुकरणं विदधाना आत्मपरिचयमेव विलोपयन्ति।
मानवजीवने संस्काराणामेकं प्रमुखं स्थानं वर्तते। सुविदितमेतत् यत् परमेश्वरेण सृष्ट्या समग्रसृष्ट्यां मानवः सर्वश्रेष्ठो मन्यते यतो हि, स विवेकशक्तिसम्पन्नम् आत्मानं विकाशयितुं समर्थः। मानवः पुण्यकर्माण्यनुष्ठाय मोक्षलाभं कर्त्तुं शक्नोति। अन्यासु समस्तयोनिषु तु प्राणिनां कर्मक्षय एव जायते। किन्तुमानवयौनौ एतेषामुपार्जनं सम्भवति।

अतएवास्माकं महर्षयो मनुष्ययोनिं सर्वोत्तमां निरूपितवन्तः।

"कदाचिल्लभते जन्म मनुष्यं पुण्यभाजनम्" [6] मानवजीवनस्य परमं लक्ष्यमात्मनः परमात्मरूपे प्रतिष्ठापनमस्ति। तत्तु विधिपूर्वकं संस्कारसाधनैः दिव्यैः ज्ञानमुत्पाद्यैव कर्त्तुं शक्यते। वस्तुतः मानवजीवनस्य सार्थकताऽपि एतादृशो प्रतिष्ठापन एव वर्तते। वेदाः, पुराणनि, धर्मशास्त्रम्, प्रतिपदं संस्काराणामावश्यकतां प्रतिपादयन्ति। उक्तमस्ति–
'आचारहीनं न पुनन्ति वेदाः" [7] अर्थात् आचारहीनो मनुष्यो न पवित्रो भवति, न च पवित्रमाचरति। मानव इच्छति यत्तस्य विकाशोऽभिवृद्धिश्च निर्विघ्नं सम्पद्येत। संस्काराणां प्रधानमुद्देश्यं वर्तते–अमाङलिकप्रभावनाम् निराकरणम्, माङलिकप्रभावानां चावाप्तिः यच्चमानव–विकाशाय चाभिवृद्धये च परमावश्यकम्। अनभीष्ट प्रभावान् निराकर्तुं संस्कारेषु विविधोपाया आश्रियन्ते। आराधनं तत्र मुख्योपायः। भूतपिशाचानाम् अन्यासाम् अशुभशक्तीनां स्तुतिं विधाय, वलिभोजनादिभिः संतोष्य तासामपक्रामणं क्रियते।

**निष्कर्षः**

भारतीयासंस्कृतिः सर्वदा आध्यात्मेनानुवर्णिता प्राणिता वर्तते। अतः क्रियाशीलस्य भौतिकजीवनस्य आध्यात्मिकजीवनेन सह समन्वयो भारतीयसंस्कृतेः परमं लक्ष्यं वरिवर्ति। संस्कार। एव तत्र आध्यात्मिकशिक्षायाः सोपानभूताः। संस्कारैः संस्कृतो मानवः सम्पूर्णमपि जीवनं संस्कारमयं मनुते।
वस्तुतः विधिपूर्वकं संस्कारसाधनैः दिव्यज्ञानमुत्पाद्य आत्मनः परमात्मरूपे प्रतिष्ठापनमेव मुख्यसंस्कारो वर्तते। मानवजीवनस्य सार्थकताप्यस्मिन्नैव संस्कारे निहिता वर्तते इति महाकविकालिदासस्य कथनेन सिद्धयति।

**सन्दर्भः**


1. मनुस्मृति–2/19।
2. रघुवंशम्–3/28।
3. रघुवंशम्–3/18।
4. अभिज्ञानशाकुन्तले–4/33।
5. आश्वलायन स्मृतिः, पृष्ठ संख्या–115।
6. धर्मशास्त्रे, पृष्ठसंख्या–125।
7. तत्रैव, भूमिकायाम्–13।